दिव्यामदत्योयाः शङ्कराः धर्मराजम्" हरिवं० १२८ अ०

**धर्मलक्षण** न० धर्मो लक्ष्यते ज्ञायतेऽनेन लक्ष–करणे ल्युट्। १धर्मप्रमापके वेदादौ। धर्मसूत्रशब्दे दृश्यम्। २मीमांसायां स्त्री ङीप्। भावे ल्युट् ६त०। चोदनालक्षणोऽर्थो धर्मः" जै० सूत्रोक्ते ३धर्मस्य लक्षणे इतरभेदानुमापके धर्मस्वरूपादौ च धर्मशब्दे दृश्यम्। "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्" इति मनूक्ते। "पात्रे दानं मतिः कृष्णे मातापित्रोश्च पूजनम्। श्रद्धा वलिर्गवां ग्रासः षड्विधं धर्मलक्षणम्" इत्युक्ते च ४धर्मस्य साधने च।

**धर्मवत्** त्रि० धर्म+अस्त्यर्थे मतुप् मस्य वः। धर्मयुक्ते धार्मिके। "मित्रावरुणवन्त उत धर्मवन्तः" ऋ० ८।३५।१३

**धर्मवर्मन्** त्रि० धर्म वर्म इव यस्य। १धर्मेणावरकत्वेन धारके २धर्मे कवचत्वेनाभिमन्यमाने। धर्मस्य वर्मेव। ३धर्मरक्षके न०। "ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि" भाग० १।१।२ [त्रिका०।

**धर्मवासर** पु० धर्मस्य तद्धाधनस्य वासरः। पौर्णमास्यां

**धर्मवाहन** पु० धर्मं वाहयति प्रापयति नरान् वाहि–ल्यु। १शिवे त्रिका०। भावे ल्युट्। धर्मस्य २प्रापणे न०। ६त०। धर्मस्य धर्मराजस्य याने ३महिषे।

**धर्मविद्** त्रि० धर्मं वेत्ति विद–क्विप्। धर्मज्ञे। "अङ्गिरसैव धर्मवित्" मनुः। [विष्णु स०।

**धर्मविदुत्तम** पु० ६त०। विष्णौ "धर्मो धर्मविदुत्तमः"

**धर्मविद्या** स्त्री ६त०। १मीमांसादिविद्यायां २तदुपलक्षित शास्त्रे च। ततः क्रत्वा० ठक्। धार्मविद्यिक तद्वेत्तरि तद्ग्रन्थाध्येतरि च।

**धर्मविप्लव** पु० ६त०। धर्मस्य व्यतिक्रमे।

**धर्मविवेक** धर्मस्य विवेकोऽत्र। हलायुधकृते धर्मनिबन्धभेदे

**धर्मवीर** पु० वीरभेदे "स च दानधर्मयुद्धैर्दयया च समन्वित चतुर्द्धा स्यात्" सा०द० उक्ते १वीररसभेदे २तद्युक्ते च "धर्मवीरो युधिष्ठिरादिः" सा० द०।

**धर्मवृद्ध** त्रि० धर्मेण वृद्धः। धर्मेण वृद्धे श्रेष्ठे अतिशयधर्मयुक्ते "न धर्मवृद्धेषु वयः समीक्ष्यते" कुमा०। २यादवे अक्रूरभ्रातृभेदे पु०। "श्वफल्कश्चित्रकश्चैव गान्दिन्यान्तु श्वफल्कतः। अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः। धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः" भाग० ९।२४।९।

**धर्मवैतंसिक** पु० धर्मे वैतंसिक इव आत्मनो धार्मिकत्वख्यापनाय दातरि। "धर्मवैतंसिको यस्तु पापात्मा पुरुषस्तथा। ददाति दानं विप्रेभ्यो लोकविश्वासकारणम्। पापेन कर्मणा विप्रो धनं लब्ध्वा निरङ्कुशः। रागमोहान्वितोऽशान्तः कलुषीं योनिमाप्नुयात्" वह्निपु०।

**धर्मव्याध** पु० धर्मप्रधानो व्याधः शाक०। धार्मिके व्याधभेदे तत्कथा भा० व० २१४ अध्यायादौ दृश्या। तस्य व्याधस्य ब्राह्मणं प्रति स्वकर्मविपाकस्तत्रोक्तो यथा "शृणु सर्वमिदं वृत्तं पूर्वदेहे ममानघ!। अहं हि ब्राह्मणः पूर्वमासं द्विजवरात्मजः। वेदाध्यायी सुकुशलो वेदाङ्गानाञ्च पारगः। आत्मदोषकृतैर्ब्रह्मन्नवस्थामाप्तवानिमाम्। कश्चिद्राजा मम सखा धनुर्वेदपरायणः। संसर्गाद्धनुषि श्रेष्ठस्ततोऽहमभवं द्विज!। एतस्मिन्नेव काले तु मृगयानिर्गतो नृपः। सहितो योधमुख्यैश्च मन्त्रिभिश्च स संवृतः। ततोऽभ्यहनृमृगांस्तत्र सुबहूनाश्रमं प्रति। अथ क्षिप्तः शरो घोरो मयाऽपि द्विजसत्तम!। ताडितश्च ऋषिस्तेन शरेणानतपर्वणा। भूमौ निपतितो ब्रह्मन्नुवाच प्रतिनादयन्। नापराध्याम्यहं किञ्चित् केन पापमिदं कृतम्। मन्वानस्तं मृगञ्चाहं सम्प्राप्तः सहसा विभो!। अपश्यं तमृषिं विद्धं शरेणानतपर्वणा। अकार्यकरणाच्चापि भृशं मे व्यथितं मनः। तमुग्रतपसं विप्रं निष्टनन्तं महीतले। अजानता कृतमिदं मयेत्यहमथाब्रुवम्। क्षन्तुमर्हसि मे सर्वमिति प्रोक्तो मया मुनिः। ततः प्रत्यब्रवीद्वाक्यमृषिर्मां क्रोधमूर्च्छितः। व्याधस्त्वं भविता क्रूरः शूद्रयोनाविति द्विज!। २१४ अ०। व्याध उवाच। एवं शप्तोऽहमृषिणा तदा द्विजवरोत्तम। अभिप्रासादयमृषिं गिरा त्राहीति मां तदा। अजानता मयाऽकार्यमिदमद्य कृतं मुने!। क्षन्तुमर्हसि तत्सर्वं प्रसीद भगवन्निति। ऋषिरुवाच। नान्यथा भविता शाप एवमेतदसंशयम्। आनृशंस्यात्त्वहं किञ्चित्कर्त्ताऽनुग्रहमद्य ते। शूद्रयोन्यां वर्त्तमानो धर्मज्ञो हि भविष्यसि। मातापित्रोश्च शुश्रूषां करिष्यसि न संशयः। तया शुश्रूषया सिद्धिं महत्त्वं समवाप्स्यसि। जातिस्मरश्च भविता स्वर्गञ्चैव गमिष्यसि। शापक्षये निवृत्ते तु भविताऽसि पुनर्द्विजः। एवं शप्तः पुरा तेन ऋषिणाऽस्म्युग्रतेजसा। प्रसादश्च कृतस्तेन ममैवं द्विपदांवर!। २१५ अ०।"